**अभिपुष्प** पु० अभितः पुष्पमस्य । १ सर्वतः पुष्पवति वृक्षे ।

**अभिपूरण** न० अभ्यासेन अभितो वा पूरणम् प्रा०स० । अभ्यासेन सर्वतः पूरणे "अभिप्लवाभ्यासेनाभिपूरणम्" कात्या० २४,३,२२, ।

**अभिप्रज्ञा** स्त्री अभितः सततं प्रज्ञा चिन्तनम् । सततचिन्तने "तमशनायापिपासे अब्रूतामावाभ्यामभिप्रजानीहि" ऐ०भा० अभिप्रजानीहि चिन्तयेति व्याख्यानात्तस्यास्तथार्थत्वम् ।

**अभिप्रणयन** न० अभितः सर्वतः प्रणयनं संस्कारः । वेदविधिना अग्न्यादेः संस्कारे ।

**अभिप्रणीत** पु० अभितः प्रणीतः । सर्वतः वेदविधिना संस्कृते वह्न्यादौ "जज्वाल लोकस्थितये स राजा यथाध्वरे वह्निरभिप्रणीतः" भट्टिः ।

**अभिप्रमुर्** स्त्री अभिप्रमूर्च्छति आहुतिदानेन वह्निरनया । १ अभि+प्र+मूर्च्छ करणे क्विप् । जुह्वाम् ।

**अभिप्रवर्त्तन** न० अभितः प्रवर्त्तनम् । १सर्वतः प्रवृत्तौ २सर्वतः प्रवृत्तिसम्पादने च "त्वक्स्वादोरोमहर्षश्च स्वेदस्याभिप्रवर्त्तनम्" सुश्रुतः ।

**अभिप्रातर्** अव्य० अत्यन्तं प्रातः । १ अतिप्रत्यूषे "अथाभिप्रातरेव स्थालीपाकाद्वृताज्यमिति" शत०ब्रा० ।

**अभिप्राप्ति** स्त्री आभिमुख्येन प्राप्तिः प्रा०स० । १ आभिमुख्येन प्राप्तौ अभिपित्वशब्दे उदाहृतं निरुक्तवाक्यम् ।

**अभिप्राय** पु० अभि+प्र+इण-भावे अच् ।१ आशये । "तेषां स्वं स्वमभिप्रायमुपलभ्य पृथक् पृथक्" मनुः ।"सर्वानभिप्रायकृतान् भार्य्यालभत कौरव" भा०उ०प० अभिप्रैति कर्त्तरि पचा० अच् । २ अभिगामिनि "स्वरितञित आत्मनेपदं कर्त्रभिप्राये क्रियाफले" पा० कर्त्रभिगामिनीति व्याख्याकारः मणिकृता तु एतत्सूत्रं कर्त्रुद्देश्यकतापरतया व्याख्यातम् तच्चापूर्वशब्दे २५० पृष्ठे दर्शितम् । अभिप्रेयते पुरुषार्थकक्रिभिः आभिमुख्येन प्रलयेऽभिप्रैति जगदस्मिन् वा कर्म्मणि आधारे वा अच् । ३विष्णौ "अभिप्रायः प्रियार्होऽर्हः" इति वि०सह० ।

**अभिप्री** त्रि० अभिप्रीणाति अभि+प्री-क्विप् । १ सर्वतस्तर्पके "तुभ्यं वाता अभिप्रियस्तुभ्यं मर्षन्ति सिन्धवः" ऋ०९,३१,३

**अभिप्रेत** त्रि० अभि+प्र+इण-क्त । १अभिलषिते "अभिप्रेतार्थसिद्ध्यर्थं मङ्गलम्" "कामाय तु भवेत् काम्यमभिप्रेतार्थसिद्धये" भवि०पु० ।

**अभिप्रेत्य** अव्य० अभि+प्र+इण-ल्यप् । १ उद्दिश्येत्यर्थे । "यदभिप्रेत्य धात्वर्थस्तत्सम्प्रदानमिति" व्याकरणान्तरम्

**अभिप्रेप्सु** त्रि० अभि+प्र+आप-सन-उ । प्राप्तुमिच्छौ "स्वहासनमभिप्रेप्सुरुत्कृष्टस्यापकृष्टजः" "ऐन्द्रं स्थानमभिप्रेप्सुः" इति च मनुः ।

**अभिप्रोक्षण** न० अभितः प्रोक्षणं संस्कारभेदः । १ जलादिना सर्वतः सेचनरूपे वैधे संस्कारे ।

**अभिप्लव** पु० अभिप्लवन्ते स्वर्गमभिगच्छन्ति अभि+प्लु-गतौ अच् । १ प्राजापत्ये आदित्ये । "अथादित्याश्च आङ्गिरसश्च उभये प्राजापत्या अस्पर्द्धन्त वयं पूर्वे स्वर्गं लोकमेष्यामो वयं पूर्व इति । आदित्याश्चतुर्भिः स्तोमैश्चतुर्भिः पृष्ठैर्लघुभिः सामभिः स्वर्गं लोकमभ्यप्लवन्त तस्मादभिप्लवाः आदित्याः" शत०ब्रा० । वर्षसाध्ये गवामयने प्रत्येकमासीयचतुर्विंशतिदिवसेषु चतुःषट्कात्मकेषु चतुर्षु षडहेषु विशेषः गवामयनशब्दे वक्ष्यते । "अभिप्लवः षडहः षड्यहानि भवन्त्यभिप्लवः" इति शत०ब्रा० । "अभिप्लवं पूर्ब्बं पुरस्ताद्विषुवत् उपयन्ति चतुर्विंशेन महाव्रतमभिप्लवेन परमभिप्लवमिति" च शत०ब्रा० । २षडहसाध्ये स्तोमादिपाठसाधनके गवामयनाङ्गयागभेदे च । ४उपप्लवे—उपद्रवे ५सर्व्वतः प्लवने च । अभिप्लवे विहितः ठक् । आभिप्लविकः उक्तषडहेषु विहिते सामादौ । [सिक्ते च ।

**अभिप्लुत** त्रि० अभि+प्लुत-क्त । १ सर्वतोव्याप्ते २अभितः

**अभिभङ्ग** त्रि० अभितोभङ्गोयस्मात् । १ भङ्गहेतौ "अभिभुवेऽभिभङ्गाय वन्वते" ऋ०२,२१,२, अभितोभङ्गः । २सर्वतोभङ्गे पु० । अभिमतोभङ्गो यस्य । ३भङ्गशीले त्रि० ।

**अभिभव** पु० अभि+भू-अप् । पराजये, तिरस्कारे, अनादरे, च । "रघोरभिभवाशङ्कि चुक्षुभे द्विषतां मनः" रघुः "अलभ्यशोकाभिभवेयमाकृतिर्विमानना सुभ्रु! कुतः पितुर्गृहे" कु० "अधर्माभिभवाच्चैव प्रदुष्यन्ति कुलस्त्रियः" गीता । रोगादिना गात्रादिजड़ीभावे "वृषसिंहवृश्चिकघटैर्विद्धि स्थानं गमागमौ न स्तः । न हृतं न चापि नष्टं न रोगशान्तिर्नचाभिभवः" षट्पञ्चाशिका ।

**अभिभवन** न० अभि+भू-ल्युट् । १ अभिभवे रोगादिना ज्ञानरोधे "जरया चाभिभवनं व्याधिभिश्चोपपीड़नम्" मनुः

**अभिभा** स्त्री अभि+भा-अङ् । १ अभिभवे "मा त्वा काचिदभिभा विश्व्याविदत्" ऋ० २,४२,१ । "अभिभा अभिभवः" भा० ।

**अभिभार** त्रि० अभिर्भ्रशार्थे अतिशयितो भारो यस्य । अतिभारान्विते "चतुरुपस्थति तद्वज्रमभिभारं करोति तेन वज्रेणाभिभारेणेमा लोकान् प्रभिनत्ति" शत०ब्रा० ।